# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-3) | **प्रश्नपत्रम्–३** (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड- CC- 5.3.8.** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०६/१२/२०१८ | **सन्दर्भग्रन्थः**– ब्रह्मवैवर्तपुराणे ब्रह्मखण्डः (१–३० अध्यायाः) | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ एकस्य ससन्दर्भान्वयप्रसङ्गपूर्वकं भावार्थो लेख्यः । ०५**

१. सत्यस्वरूपं सत्येशं सत्यबीजं सनातनम् ।
सत्याधारं च सत्यज्ञं सत्यमूलं नमाम्यहम् ॥

२. गोगोपगोप्यो गोलोके किं नित्याः किन्तु कल्पिताः ।
मम सन्देहभेदार्थं तन्मे व्याख्यातुमर्हसि ॥

**प्र–२ कस्याप्येकस्य सविस्तरमुत्तरं लिखत । १०**

१. यथाग्रन्थं सृष्टिनिरूपणं वर्णयत ।

२. ब्रह्मनारदयोः परस्परशापप्रसङ्गं लिख्यताम् ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ एकस्य ससन्दर्भान्वयप्रसङ्गपूर्वकं भावार्थो लेख्यः । ०५**

१. अकीर्तिजनकपुंसां योषिताञ्च विशेषतः ।
तेजीयसां न दोषाय विद्यमाने युगे युगे ॥

२. ऋषिवंशप्रसङ्गेन बभूवुर्विविधाः कथाः ।
उपालम्भेन प्रस्तावात् कौतुकेन श्रुता मया ॥

**प्र–४ एकस्य सविस्तरम् उत्तरं देयम् । १०**

१. विष्णुमालावतीसंवादो यथाग्रन्थं विलिख्यताम् ।

२. रोगचिकित्सावर्णनं यथाग्रन्थं क्रियताम् ।

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य ससन्दर्भान्वयप्रसङ्गपूर्वकं भावार्थो लेख्यः । ०५**

१. देवाः सार्धं ब्राह्मणेन मोहिता विष्णुमायया ।
प्रययुर्मालतीमूलं ब्रह्मेशानपुरोगमाः ॥

२. आविर्भावस्तिरोभावः स्वेच्छया नित्यदेहिनाम् ।
जन्ममृत्युजराव्याधिर्भक्तानां नास्ति शौनक ॥

**प्र-६ एकस्य सविस्तरम् उत्तरं लिखत । १०**

१. ब्रह्मपुत्राणां नाम्नां व्युत्पत्तिः लिख्यताम् ।

२. ब्रह्मनारदोक्तं सांसारिकसुखदुःखवर्णनं क्रियताम् ।

**प्र-७ एकस्य ससन्दर्भान्वयप्रसङ्गपूर्वकं भावार्थो लेख्यः । ०५**

१. चकार तत्रैव निवेदनं शिवे मनोऽभिलाषं भवकामपूरके ।
श्रुत्वा मुनेस्तद्वचनं कृपानिधिर्द्रुतं प्रतिज्ञां प्रचकार वोमिति ॥

२. भक्ष्यं किं वाप्यभक्ष्यं च द्विजानां गृहिणां प्रभो ।
यतीनां वैष्णवानाञ्च विधवाब्रह्मचारिणाम् ॥

**॥ चतुर्थान्वितिः ॥**

**प्र-८ एकस्य सविस्तरमुत्तरं दीयताम् । १०**

१. शिवेन प्रदत्तः नारदोपदेशः यथाग्रन्थं लेख्यः ।

२. संसारपावनं शिवकवचं वर्णयन्तु ।

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१. ब्रह्मवैवर्तपुराणप्रथमभागे कति खण्डाः ? के च ते?

२. तन्मात्रा कति? काश्च ताः?

३. सौतिः - इत्यस्य कोऽर्थः ? का च व्युत्पत्तिः?

४. जलस्य अधिष्ठाता देवः कः ?

५. मार्कण्डेयमुनेः जीवनं कियदस्ति?

६. कल्पाः कति? के च ते?

७. शिव - इत्यस्य कोऽर्थः ?

८. कति द्विपाः? के च ते?

९. मनुना आकूतिकन्या कस्मै दत्ता?

१०. दक्षेण चन्द्रमसे कति कन्याः दत्ताः?

११. विनतायाः कतिपुत्राः जाताः? के च ते?

१२. ब्रह्माण्डपावनकवचस्य छन्दः किमस्ति?

१३. नारद - इत्यस्य व्युत्पत्तिः का स्यात्?

१४. गुरौ रुष्टे रक्षणे के न समर्थाः ?

१५. स्नानश्लोकः सुप्रसिद्धः कः ?

--००--